श्रीगणेशायनमः ॐ नमः ऋषभ उवा
प्रायश्चित्तार्थंश्रीधेनुरूपीवागीश्वरीसरस्वतीप्रीत्यर्थंकल्पोक्तफलावाप्त्यर्थंसर
स्वतीदशश्लोकीस्तोत्रजपमहंकरिष्ये।

सरस्वतीस्तोत्र

१ श्रीगणेशायनमः॥ऋषयऊचुः॥कथंसारस्वतःप्राप्तिःकेनध्यानेन
सव्रत॥महासरस्वतीयेनतुष्टाभवतितद्वद॥१॥आश्वलायनउवा
च॥शृण्वंतुऋषयःसर्वेगुह्याद्गुह्यतरंमहत्॥दशश्लोकमिदंस्तो
त्रंध्यानपूर्ववंवदाम्यहं॥२॥ध्यानं॥अक्षस्रक्कुशधरांपाशपु
स्तकधारिणीं॥मुक्ताहारैःसमायुक्तांदेवीध्यायेच्चतुर्भुजां॥३॥
सितेनदर्पणाभेनवस्त्रेणपरिभूषितां॥चारुस्तनीवेदमध्यांचंद्रा
र्धहृतशेखरां॥४॥जटाकलापसंयुक्तांपूर्णचंद्रनिभाननां॥त्रि
त्रिलोचनांमहादेवीस्वर्णनूपुरधारिणीं॥५॥कटकैःस्वर्णरत्ना
द्यैःमहावलयभूषणैः॥सुभूषितांसुधाकांतिभारतीप्रणमा

म्यहं॥६॥केयूरैर्मेखलाद्यैश्चद्योतयंतींजगत्त्रयं॥परब्रह्ममयी
ध्यायेज्ज्ञानकामःसमाहितः॥७॥परब्रह्मात्मिकांदेवीं मुक्तिमुक्तिफ
लप्रदां॥प्रणम्यस्तौमितांदेवीज्ञानशक्तिंसरस्वतीं॥८॥शुद्धस्फटि
कसंकाशांजटामुकुटमंडितां॥सर्वविद्यात्मिकांदेवीं ध्यायेत्तांवरदु
मंडितां॥९॥अस्यश्रीदशश्लोकमंत्रस्य॥आश्वलायनऋषिः
॥श्रीधेनुरूपीवागेश्वरीदेवता॥अनुष्टुप्छंदः॥यद्वाग्वादिनी
जं॥देवीवाचमितिशक्तिः॥प्रणोदेवीतिकीलकं॥श्रीवागेश्वरी
देवताप्रीत्यर्थंजपेविनियोगः॥वक्ष्येसारस्वतंस्तोत्रंवाक्प्रवृत्ति
करंशुभं॥लक्ष्मीविवर्धनंनित्यंविवादेविजयप्रदं॥१०॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

प्रणोदेवीतिमंत्रस्य॥भरद्वाजऋषिः॥सरस्वतीदेवता॥गायत्रीछंदः॥
ममवाक्सिध्यर्थंजपे०॥प्रणोदेवीसरस्वतीवाजेभिर्वाजिनीवती॥
धीनामवित्र्यवतु॥यावेदांतोक्ततत्त्वार्थस्वरूपापरमार्थतः॥नामरू
पात्मनाव्यक्तासामांपातुसरस्वती॥१॥आनोदिवइतिमंत्रस्य॥
अत्रिऋषिः॥सरस्वतीदेवता॥त्रिष्टुप्छंदः॥ममवाक्सिध्यर्थं०॥
ॐआनोदिवोबृहतःपर्वतादासरस्वतीयजतागंतुयज्ञं॥हवंदेवी
जुजुषाणाघृताचीशग्मांनोवाचमुशतीशृणोतु॥यासांगोपांग
वेदेषुचलुर्षेकेवगीयते॥अदैतांब्रह्मणःशक्तिःसामा०॥२॥
पावकानइतिमंत्रस्य॥भरद्वाजऋषिः॥सरस्वतीदेवता॥गाय

२

त्रीछंदः॥ममवा०॥ॐपावकानःसरस्वतीवाजेभिर्वाजिनीवती॥यज्ञंवष्टु
धियावसुः॥यात्रस्यगंधर्वैर्नित्यमानानुभूयते॥व्यापिनीज्ञप्ति
रूपेकासा०॥३॥चोदयित्रीतिमंत्रस्य॥विश्वामित्रऋषिः॥सरस्वतीदेव
ता॥गायत्रीछंदः॥ममवाक्०॥ॐचोदयित्रीसूनृतानांचेतंतीसुमतीनां
॥यज्ञंदधेसरस्वती॥यावर्णपदवाक्यार्थस्वरूपेणविराजते॥अना
दिनिधनादेवीसामा०॥४॥महोअर्णइतिमंत्रस्य॥विश्वामित्रऋषिः
॥सरस्वतीदेवता॥गायत्रीछंदः॥मम०॥ॐमहोअर्णःसरस्वतीप्रचे
तयतिकेतुना॥धियोविश्वाविराजति॥व्यक्ताव्यक्तगिरःसर्वेदेवाया
व्याहरंतियां॥सर्वकामदुघाधेनुःसामांपातु०॥५॥चत्वारिवाणि

तिमंत्रस्य॥औचथ्यपुत्रोदीर्घतमाऋषिः॥सरस्वतीदेवता॥त्रिष्टुप्छंदः॥
ममवा०॥ॐ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः
॥गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्याबदंति॥नामजात्यादि
भिर्भेदैरष्टधाविकल्पिका॥निर्विकल्पात्मनाचैकासामा०॥१६॥
उतत्वमितिमंत्रस्य॥विश्वामित्रऋषिः॥सरस्वतीदेवता॥त्रिष्टुप्छंदः॥
ममवाक्०॥ॐउतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्ये
नां॥उतोत्वस्मैतन्वं॥विसस्रेजायेवपत्युशतीसुवासाः॥नामरू
पात्मकंसर्वंयस्यामावेश्यतांपुनः॥ध्यानंतिब्रह्मरूपैकासामां
पातु०॥१७॥यद्वाग्वदंतिमंत्रस्य॥मौनभार्गवऋषिः॥सरस्व
तीदेवता॥त्रिष्टुप्छंदः॥ममवाक्०॥यद्वाग्वदंत्यविचेतनानिराष्ट्रीदेवानां
निषसादमंद्रा॥चतस्रऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमंजगाम॥
अंतरात्मात्मनाविश्वत्रैलोक्यंयाधिगछति॥रुद्रादित्यासरूपच्छा
सामां०॥१८॥देवीवाचमितिमंत्रस्य॥मौनभार्गवऋषिः॥वागीश्वरी
देवता॥त्रिष्टुप्छंदः॥ममवाक्०॥ॐदेवीवाचमजनयंतदेवाःस्वावि
श्वरूपाःपशवोवदंति॥सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानु
पसृष्टैतु॥यावंदितावित्रैलोक्यंनिर्मायावित्रैलवर्त्मना॥योगीयाति
परंस्थानंसामांपातु॥१९॥अंबितमेतिमंत्रस्य॥मौनभार्गवऋ
षिः॥वागीश्वरीदेवता॥अनुष्टुप्छंदः॥ममवाक्०सि०॥ॐअं

बितमेनदीतमेदेवितमेसरस्वति॥अप्रशस्ताश्वस्मसिप्रशस्ति
संबनस्पधि॥अध्यात्ममधिदेवंवदेवानांसम्यगीश्वरी॥प्रत्यग
स्लेवदंतीयासामंपातु०॥२७॥पद्मपत्रविशालाक्षीपद्मकेशरवा
सिनी॥नित्यंपद्मालयेदेविवागेश्वर्यैनमोस्तुते॥२८॥यंकवि
त्वंनिरातंकंमुक्तिमुक्तिंचवांछति॥सोप्यर्चेनोदश्लोकाभ्यां
क्यास्तोतिसरस्वतीं॥२९॥तस्येवंस्तुवतेनित्यंसम्यक्सरस्व
ती॥भक्तिश्रद्धाभियुक्तस्यषण्मासात्प्रत्ययोभवेत्॥३०॥त
तःप्रवर्त्ततेवाणीस्वच्छयास्खलिताक्षरा॥गद्यपद्यात्मनावश्यं ४
प्रमेयैश्चविवक्षितैः॥३१॥अश्रुतंबुध्यतेग्रंथंप्रायःसारस्वतः

कविः॥श्रुतंतंधारयेद्यश्चुःस्वल्पह्रीस्पष्टवाक्भवेत्॥३२॥
स्वयूथेवंदवाद्येश्चविवादेप्रस्थितेसति॥अहंवाक्स्पतिर्विद्वं
शिरोवास्मीतिशंवदेत्॥३३॥एवंभावयतानेनबृहस्पतिरसं
स्पर्शं॥नशक्नोतिस्वयंवक्तुंनरेणन्येषुकाकथा॥३४॥नकोच
नस्त्रियंनिंदेनदेवानपिचद्विजान्॥अनार्यंनाभिभाषेतस
त्रैववक्षमीभवेत्॥३५॥सर्वत्रैवप्रियंब्रूयाद्यदिछेत्सिद्धि
मात्मनः॥श्लोकेरेवतिरस्कुर्याद्विषंतंप्रतिवादिनं॥३६॥प्रति
वादिमजानांचसिंहोभवतिसस्वयं॥यद्वागीतिरुक्तेनैवदे
वीयोर्चयतेनरः॥३७॥याकुंदेंदुतुषारहारधवलायाशुभ्रव

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

स्त्रारत्नावीणावरदंडमंडितकरायाश्वेतपद्मासना॥ याब्रह्मा
च्युतशंकरप्रभृतिभिर्देवैःसदावंदितासामांपातु सरस्वती
भगवतीनिःशेषजाड्यापहा॥३२॥ होर्शियुक्ताचतुर्भिस्स्फटिकम
णिमयीमक्षमालांदधानोहस्तैर्नकपद्मासितमणिचषुकंपु
स्तकंचापरेण॥ यास्कुंदेंदुशंखस्फटिकमणिनिभाभास्वरा
नासमानासामेवाग्देवतेयंनिवसतुवदने सर्वदासुप्रसन्ना॥
॥३३॥शरदिंदुविकासपद्महासांशरदिंदीवरलोचनाभिरामां॥
अरविंदसमानवक्त्रशोभामरविंदासनसुंदरीनमामि॥३४॥
पाशांकुशधरावाणीवीणापुस्तकधारिणी॥ममवक्त्रेवसेनि

यंदुगर्भकुंदेंदुनिर्मलः॥३५॥ यस्यस्मरणमात्रेणवाग्विभूतिर्भवे
भृतेसभारतीविरंचिनारायणतोतन्मुखांबुजे॥३६॥ इत्याश्वला
यनमिदंनिजगादेव्याःस्तोत्रंसमस्तफलभोगनिदानभूतं॥
एतत्पठेद्धिनरःश्रुचितामुपेतःसंध्यासुवांछितफलान्युप
यातिशीघ्रं॥ ॥३७॥ ॥इत्याश्वलायनप्रोक्तंसरस्वतीस्तो
त्रंसंपूर्णं॥ ॥ ॥श्रीसोमेश्वरार्पणमस्तु॥ ॥छ॥ छु॥॥